IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 5, December 2025
Impact Factor: 7.67

# श्रीदेवीगीतायां ज्ञानमीमांसा

**प्रो. कुसुमडोबरियाल**

संस्कृत विभागाध्यक्षा, हेमवती नन्दन बहुगुणा, गढवाल, विश्वविद्यालय, पौडी, गढवाल, उत्तराखण्ड

तीजराम वर्मा

शोधच्छात्र, संस्कृत विभाग, हेमवती नन्दन बहुगुणा, गढवाल, विश्वविद्यालय, पौडी, गढवाल, उत्तराखण्ड

kusumdobriyal62@rediffmail.com and atirthramji@gmail.com

**सारांशः** – श्रीमद्देवीभागवतमहापुराणं पुराणवाङ्मयेऽत्यन्तं महिमामये स्थाने विद्यते। शक्त्युपासका इदं पुराणम् शाक्तभागवतमपि कथयन्ति। ग्रन्थेऽस्मिन् सर्वत्र भगवत्या आद्याशक्तेर्महिम्नःप्रतिपादनं क्रियते । अत्र मुख्यत्वेन परब्रह्मण:परमात्मनो मातृरूपस्य तस्य उपासनायाश्च वर्णनं प्राप्यते। संसारे सर्वेषां प्राणिनां कृते मातृभावस्य महान् महिमा वर्तते। स्वाभाविकरूपेण मानवस्याधिकं श्रद्धा मातृचरणेषु भवति यतो हि लोकस्य सर्वप्रथमं दर्शनं स मातृक्रोडे करोति तस्मान्माता सर्वेषामादिगुरुत्वेन प्रतिष्ठिता । मातुःकृपा लौकिकस्य पारलौकिकस्य च कल्याणस्य आधारस्तस्मादुक्तम् - **“मातृदेवो भव”**[1] । या भगवती महाशक्तिस्वरूपिणी तथा सम्पूर्णजगतो माता सैव सम्पूर्णलोकस्य गुरुस्वरूपा ।

मातुरस्य गुरुस्वरूपस्य दर्शनं ‘श्रीदेवीगीतायां’ भवति। श्रीदेवीभागवतमहापुराणस्य केचन अध्यायाः ‘श्रीदेवीगीता’ इति नाम्ना प्रसिद्धम्। अस्यां गीतायां भगवती पर्वतेन्द्राय वेदान्तज्ञानमुपदिशति। अहमेव भगवती वेदान्तशास्त्रेषु ब्रह्मरूपेण कथितं मम स्वाभाविकी शक्तिः माया। माया एव प्रकृतिः,अविद्या, प्रधानमित्यादि नाम्ना व्यवह्रियते। मायाविशिष्टो ब्रह्म अव्यक्तं कथ्यते तस्मादेवाऽव्यक्तादाकाशादिक्रमेण सम्पूर्णसृष्टिर्जायते। जगतःकारणं अज्ञानम् । अविद्यया कामना, कामनया कर्म , कर्मणा जन्ममरणचक्रं भवति । अज्ञानस्य ज्ञानेन निवृत्तिर्भवति। निष्कामकर्मणा चितस्य मलपसार्य ‘तत्त्वमसि’ इत्यादीनां महावाक्यानामर्थबोधं कुर्यात्। उपाधीनां ज्ञानेन निवृत्तौ ‘अहं चैतन्यमिति’ बोधो भवति ।

**सङ्केत शब्दः -** श्रीमद्देवीभागवतमहापुराणम्, ज्ञानम्, श्रीदेवीगीता, तत्त्वमसि, ब्रह्म, माया, प्रकृतिः, अज्ञानम्, आत्मा।

1 तैत्तिरीयोपनिषद् ०१/११/०२